वर्त्तमानः, पुं, (वर्त्तते इति । वृत्+शानच् । मुक् ।) प्रयोगाधिकरणीभूतकालः । इति नैयायिकाः ॥ तत्कालवृत्ते, त्रि । तयोः पर्य्यायौ । अद्यतनः २ अधुनातनः ३ । इति राजनिर्घण्टः ॥ वैयाकरणमते तु । आरब्धापरिसमाप्तिर्व्वर्त्तमानः कालः । यथा । महाभारतं पठति । स तु चतुर्व्विधः । यथा,—

"प्रवृत्तोपरतश्चैव वृत्ताविरत एव च ।
नित्यप्रवृत्तः सामीप्यो वर्त्तमानश्चतुर्व्विधः ॥"

क्रमेणोदाहरणानि । मांसं न खादति आदौ प्रवृत्तं मांसभोजनं निवर्त्तयति इत्यर्थः । इह कुमाराः क्रीड़न्ति तदानीन्तनक्रीड़नाभावेऽपि पूर्व्वक्रीड़ानां बुद्धौ वर्त्तमानत्वात् । पर्व्वतास्तिष्ठन्ति नित्यप्रवृत्तत्वात् । किञ्च पर्व्वतानां स्थितत्वे वर्त्तमानत्वेऽपि भूतभविष्यत्कालाभ्यां सम्बन्धविवक्षया पर्व्वतास्तस्थुः स्थास्यन्ति इत्यपि स्यात् । सामीप्यो द्विविधः । भूतसामीप्यो भविष्यत्सामीप्यश्च । भूतसामीप्ये यथा । कदा आगतोऽसि इति प्रश्ने अध्वखेदादेर्व्वर्त्तमानत्वात् एषोऽहमागच्छामि इति आगतोऽपि वदति । भविष्यत् सामीप्ये यथा । कदा गमिष्यसि इति प्रश्ने एषोऽहं गच्छामि इति गमनक्रियमाणोद्यमोऽपि वदति । इति मुग्धबोधटीकायां दुर्गादासः ॥

वर्त्तरूकः, पुं, (वर्त्तो घर्त्तनं राति गृह्लातीति । रा+वाहुलकात् ऊकः ।) नदीभेदः । काकनीड़ः । जलावटः । इति मेदिनी । के, २१२ ॥ द्वारपालः । यथा,—

"मन्त्री ग्रन्थिहरोऽमात्यो द्वाःस्थितो वेत्रधारकः ।
दौःसाधिको वर्त्तरूको गर्व्वाटो दण्डवासिनि ॥"
इति त्रिकाण्डशेषः ॥

वर्त्तलोहं, क्ली, (वर्त्तते इति । वृत्+अच् । ततः कर्म्मधारयः ।) लौहविशेषः । विद्रुरि इति भाषा । इति केचित् ॥ तत्पर्य्यायः । वर्त्ततीक्ष्णम् २ वर्त्तकम् ३ लोहसङ्करम् ४ नीलकम् ५ नीललोहम् ६ नीलजम् ७ वर्त्तलोहकम् ८ । अस्य गुणाः । कटुत्वम् । तिक्तत्वम् । शिशिरत्वम् । कफदाहपित्तनाशित्वम् । मधुरत्वम् । पित्तदाहशमनत्वञ्च । इति राजनिर्घण्टः ॥

वर्त्तिः, स्त्री, (वर्त्ततेऽनया इति । वृत्+"कृपिषिरुहिवृतिविदिच्छिदिकीर्त्तिभ्यश्च ।" उणा० ४ । ११८ । इति इन् ।) भेषजनिर्म्माणम् । नयनाञ्जनम् । लेखः । गात्रानुलेपनी । दीपदशा । (यथा, भागवते । ५ । ११ । ८ ।

"यथा प्रदीपो घृतवर्त्तिमश्नन्
शिखाः सधूमा भजति ह्यन्यदा स्वम् ॥")

दीपः । इति मेदिनी । ते, ५५ ॥ * ॥ वर्त्तिविशेषो यथा,—

"कतकस्य फलं शङ्खः सैन्धवं त्र्यूषणं वचा ।
फेनो रसाञ्जनं चौद्रं विड़ङ्गानि मनःशिला ।
एषां वर्त्तिर्हन्ति कासं तिमिरं पटलं तथा ॥"
इति गारुड़े १९८ अध्यायः ॥

(वर्त्ततेऽनयेति । वृत्+"वृतेश्छन्दसि ।" उणा० ४ । १४० । इति इः । वाहुलकात् लोकेऽपि । योगकर्म्मद्वयम् । इत्युज्ज्वलदत्तः ॥)

वर्त्तिकः, पुं, पक्षिविशेषः । वटेर इति हिन्दी भाषा । तत्पर्य्यायः । वार्त्तिकः २ वर्त्तौ ३ शाङ्गिकायः ४ । अस्य मांसगुणाः ।

"तद्दच्च वार्त्तकं मांसं निर्द्दोषं वीर्य्यपुष्टिदम् ।"

तद्दत् तित्तिरवत् । इति राजनिर्घण्टः ॥

वर्त्तिका, स्त्री, वर्त्तकपक्षी । इत्यमरः ॥ वर्त्मनि वर्त्तत इत्यच् वर्त्तः । स्वार्थे कः वर्त्तकः । भारुइ इति ख्यातः । वृतिलतिभ्यां तिकः वर्त्तिका स्त्रीलिङ्गा । वाट्भार इति ख्याता । नामद्वयमिदमित्यमरदीपिका । वर्त्तिकेति स्त्रियामीत्वप्रतिषेधार्थं द्वयोरुपादानमिति माधवी । रूपभेदप्रदर्शनार्थमिति रायमुकुटः । इति सट्टीका सारसुन्दरी ॥ सा च वटेर पक्षी इति नाम्ना ख्याता । अस्या मांसगुणाः ।

"वर्त्तिका मधुरा रूक्षा कफमारुतनाशिनी ॥"
इति राजवल्लभः ॥

अजशृङ्गी । इति राजनिर्घण्टः ॥ (वर्त्ति+स्वार्थे कन् । टाप् ।) वर्त्तिः । वाति इति शलिता इति पलिता इति च भाषा । इत्युणादिकोषः ॥ * ॥ सा पञ्चविधा । यथा,—

"पद्मसूत्रभवा दर्भगर्भसूत्रभवाथवा ।
शालजा वादरी वापि फलकोषोद्भवाथवा ।
वर्त्तिका दीपकृत्येषु सदा पञ्चविधा स्मृता ॥"
इति कालिकापुराणे ६८ अध्यायः ॥

वर्त्तिष्णुः, त्रि, (वर्त्तते इति । वृत+"अलङ्कृञ्निराकृञ्प्रजनोत्पचोत्पतोन्मदरुच्यपत्रपवृतुवृधुसहचर इष्णुच् ।" ३ । २ । १३६ । इति इष्णुच् ।) वर्त्तनशीलः । तत्पर्य्यायः । वर्त्तनः । इत्यमरः । ३ । १ । २६ ॥ वर्त्ती । इति हेमचन्द्रः । ३ । ५३ ॥ (यथा, भट्टौ । ५ । १ ।

"निराकरिष्णू वर्त्तिष्णू वर्द्धिष्णू परितो रणम् ।
उत्पतिष्णू सहिष्णू च चेरतुः खरदूषणौ ॥")

वर्त्तिष्यमाणः, त्रि, (वृत्+भविष्यति स्यमानप्रत्ययः ।) भविष्यत्कालादिः । वर्त्तमानप्रागभावाश्रयः । इति राजनिर्घण्टः ॥ (यथा, साहित्यदर्पणे । ६ । ३०८ ।

"वृत्तवर्त्तिष्यमाणानां कथांशानां निदर्शकः ॥
संक्षिप्तार्थस्तु विष्कम्भ आदावङ्कस्य दर्शितः ॥")

वर्त्तीं, स्त्री, (वर्त्ति+कृदिकारादिति ङीष् ।) वर्त्तिः । इत्यमरटीका ॥ (यथा, महाभारते । ४ । २१ । २३ ।

"आसीदभ्यधिका चास्य श्रीः श्रियं प्रमुमुक्षतः ।
निर्व्वाणकाले दीपस्य वर्त्तीमिव दिधक्षतः ॥")

वर्त्ती, [न्] (वर्त्तते इति । वृत्+णिनिः ।) वर्त्तिष्णुः । इति हेमचन्द्रः । ३ । ५३ ॥

वर्त्तुलं, त्रि, (वर्त्तते इति । वृत्+वाहुलकात् उलच् ।) गोलवस्तु । तत्पर्य्यायः । निस्तलम् २ वृत्तम् ३ । इत्यमरः । ३ । १ । ६६ ॥ मण्डलायितम् ४ । इति शब्दरत्नावली ॥ * ॥ (यथा, भागवते । ५ । १६ । ५ ।

"यो वा अयं द्वीपः कुवलयकमलकोशाभ्यन्तरनियुतयोजनविशालः समवर्त्तुलो यथा पुष्करपत्रम् ॥") सम्पूर्णगर्भवृत्तानि यथा,—

"सम्पूर्णगर्भवृत्तानि मुखपद्मेन्दुदर्पणाः ।
चक्रावहट्टतिलकन्दुदङ्गपुटशायकाः ॥
आवर्त्तः कमठो लूताग्रहं छत्रमपूपकम् ।
आलवालमहीजालचर्म्मकं शाणकादयः ॥" * ॥

वृत्तानि यथा,—

"वृत्तानि वाहुनारङ्गस्कन्धधम्मिल्लमोदकाः ।
रथाङ्गलावककुतकुम्भिकुम्भाण्डकादयः ॥
कर्णपाशभुजापाशाक्षचापघटाननम् ।
मुद्रिकापरिखायोगपट्टहारस्रगादयः ॥"
इति कविकल्पलतायाम् २ स्तबके ३ कुसुमम् ॥

वर्त्तुलं, क्ली, गृञ्जनम् । इति राजनिर्घण्टः ॥

वर्त्तुलः, पुं, कलायविशेषः । वाटुला । इति भाषा । यथा,—

"कलायस्य त्रयो भेदा त्रिपुटो वर्त्तुलोऽकुटी ।"
इति शब्दमाला ॥

वर्त्तुला, स्त्री, (वर्त्तुल+टाप् ।) तर्कुपाटी । इति हारावली । २१३ ॥ टेकोर वाँटुल इति भाषा ॥

वर्त्तुली, स्त्री, (वर्त्तुल+गौरादित्वात् ङीष् ।) गजपिप्पली । इति राजनिर्घण्टः ॥ (विवरणमस्या गजपिप्पलीशब्दे ज्ञातव्यम् ॥)

वर्त्म, [न्] क्ली, (वर्त्ततेऽनेनास्मिन् वेति । वृत्+मनिन् ।) पन्थाः । इत्यमरः । २ । १ । १५ ॥ (यथा, ऋग्वेदे । १ । ८५ । ३ ।

"गोमातरो यच्छुभयन्ते अञ्जिभि-
स्तनूषु शुभ्रा दधिरे विरुक्मतः ।
वाधन्ते विश्वमभिमातिनमप-
वर्त्मान्येषामनुरीयते घृतम् ।"

"वर्त्मानि मार्गाननुस्त्य ।" इति तद्भाष्ये सायणः ॥ यथा च रघौ । २ । २० ।

"पुरस्कृता वर्त्मनि पार्थिवेन
प्रत्युद्गता पार्थिवधर्म्मपत्न्या ।
तदन्तरे सा विरराज धेनु-
र्दिनक्षपामध्यगतेव सन्ध्या ॥")

नेत्रच्छदः । इति मेदिनी । ने, १२८ ॥ (यथा, अश्ववैद्यके । २ । १० ।

"सितासितञ्च तन्मध्ये नेत्रयोर्म्मण्डलं हि तत् ।
प्रच्छादनं भवेद् वर्त्म चाक्षिकूटमतः परम् ॥")

वर्त्मनिः, स्त्री, (वर्त्तते इति । वृत्+"वृतेश्च" उणा० २ । १०७ । इति अनिः । नकारात् मुड़ागमोऽप्यत्रेति केचित् । वर्त्मनिरिति गोवर्द्धनः । इत्युज्ज्वलदत्तोक्त्या साधुः ।) पन्थाः । इत्युणादिकोषः ॥

वर्द्ध, क पूर्त्तिच्छेदोः । इति कविकल्पद्रुमः ॥ (चुरा०-पर०-सक०-सेट् ।) क, वर्द्धयति । वृद्ध क दीप्ताविव्यत्रैव पूर्त्तिच्छेदोश्च पाठादिद्दसिद्धा-